National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(22): 13 -16
© 2019 NJHSR
www.sanskritarticle.com

**हेमलता**
शोधछात्रा,जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-
विद्यापीठम्,नवदेहली-110016

**Correspondence:**
हेमलता
शोधछात्रा,जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-
विद्यापीठम्, नवदेहली-110016

# णमोकारमहामंत्रस्य मङ्गलतत्त्वम्

**हेमलता**

भारतीयशब्दशास्त्रमपि अति गूढगम्भीरोऽस्ति। अत्र अल्प-अल्प शब्दानां गागरे दीर्घ अर्थानां महासागराः परिपूर्णाः सन्ति। विद्वज्जनाः स्व सम्पूर्ण जीवने एतेषां शब्दानां गूढ गम्भीरार्थं ज्ञातुं प्रयत्नं कुर्वन्ति। मंगलं शब्दोऽपि इत्थमेव अल्प शब्दः,परञ्च अत्यन्त सारगर्भितशब्दोऽस्ति। मंगलस्यार्थः अत्यधिकव्यापकं गूढमपि चास्ति।

मंगलं इति मंगलं शब्दे सम्पूर्ण भारतीय संस्कृतेः आत्मा वसति।

प्राचीनकालात् अद्यपर्यन्तं निरन्तरमेतस्य शब्दस्य प्रयोगः भारतीयजनजीवने दृश्यते। प्राकृतसंस्कृतभाषायां प्राचीनग्रन्थेषु एतस्य शब्दस्य अति प्रयोगाः प्राप्नुवन्ति, वर्तमान अपि एतस्य शब्दस्य प्रयोगः अल्पः न दृश्यते। यथा-

1-आगामिदिवसे ममगृहस्य मंगलप्रवेशः भवतां प्रार्थयन्तु।
2-नववर्षः भवतां कृते मंगलं भवेत्।
3-भवतां यात्र मंगलमयी भवेत्।
4-शास्त्रसमारम्भे मंगलाचरणम् अवश्यमेव करणीयम्।

णमोकारमहामन्त्रस्य शुद्धस्वरूपम् अर्थश्च-

णमोअरिहंताणं - नमो अरिहन्तेभ्यः।
णमो सिद्धाणं - नमो सिद्धेभ्यः।
णमो आइरियाणं - नमो आचार्येभ्यः।
णमो उवज्झायाणं - नमो उपाध्ययेभ्यः।
णमो लोए सव्व साहुणं - नमो सर्वसाधुभ्यः।

**अर्थः-**

'पूज्यऽर्यिका ज्ञानमतिः स्वसिद्धान्तचिंतामणिटीकायां णमो' इत्यादिपदखण्डनारूपेण व्याख्यानं क्रियते। णमो नमस्कारोऽस्तु। केभ्यः? अरिहंताणंअर्हदभ्यः। इत्यादि पञ्चपदेषु ज्ञातव्यः।

'सर्वनमस्कारष्वत्रतनसर्वलोकशब्दावन्त्यदीपकत्वादध्याहर्तव्यौ सकलक्षेत्रगतत्रिकालगोचरार्हदादि देवता प्रणमनार्थम्।'[1] इति न्यायेन णमो अरिहंताणम् अस्यार्थः सार्धद्वय द्वीपेषु सप्तव्यधिकशतकर्मभूमिषु संजातेभ्यस्त्रि कालगोचरेभ्योऽर्हद्भ्यो नमः। णमो सिद्धाणं सकलकर्मभमिभ्यः सिद्धपदप्राप्तेभ्यः संहरणसिद्धापेक्षया सार्धद्वयद्वीपद्वयसमुद्रेभ्यः सिद्धपदप्राप्तेभ्यश्च त्रिकालगोचरेभ्यः सिद्धेभ्यो नमः।

णमो आइरियाणं सकलकर्मभमिषूत्पन्न भ्यस्त्रिकालगोचरेभ्य आचार्येभ्यो नमः। णमो उवज्झायाणं अखिलकर्मधरासूत्पन्नेभ्यस्त्रिकालगोचरेभ्य उपाध्यायेभ्यो नमः। णमो लोए सव्वसाहुणं निखिलकर्मभेदिनीषूत्पन्नेभ्यस्त्रिकालगोचरेभ्यः साधुभ्यो नमः।'[2]

**चतारि मंगलम्-**

**'चतारि मंगलं, अरहंता मंगलं, सिद्धा मंगलं,**
**साहू मंगलं, केवलिपण्णतो धम्मो मंगलं।**
**चतारि लागुतमा, अरहंता लोगुतमा, सिद्धा लोगुतमा,**
**चतारि शरणं पव्वज्जामि, अरहंते शरणं पव्वज्जामि,**
**सिद्धेशरणं पव्वज्जामि, साहू शरणं पव्वज्जामि,**
**केवलिपणतं धम्मं शरणं पव्वज्जामि।'[3]**

लोके मङ्गलचतुष्टयम्। अरहंतभगवन्तः मंगलाः सन्ति, सिद्धाभगवन्तः मंगलाः सन्ति, साधवः मंगलाः सन्ति, तथा केवली प्रज्ञप्तं धर्ममस्ति।

यत् मोह राग द्वेष रूपी पापान् नाशयति, समीचीनं च सुखमुत्पद्यते, तं मंगलं कथ्यते। अरहंतादिक स्वयं मंगलमयः अस्ति, तस्मिन् भक्तिभावे सति परममंगलं भवति।

लोके चत्वारः मंगलाः सन्ति। अरंहंत भगवन्तः उतमा सन्ति, सिद्ध भगवन्तः उतमा सन्ति, साधवः उतमा सन्ति, तथा केवली भगवताः कथितं धर्ममंगलमस्ति।

लोके यः महान् भवति तम् उतमः कथ्यते। लोके ये चत्वारः सर्वमहान्तः सन्सि, अतः उतमाः कथ्यते।

अहं चतुर्णां शरणं गच्छामि यथा- अरहंतभगवतः सिद्ध भगवतः साधव भगवतः च शरणं गच्छामि, तथा केवली प्रज्ञप्तं वीतरागधर्मस्य शरणं गच्छामि।

शरणं साह्यड्गयं कथ्यते, या व्यक्तिपंचपरमेष्ठीनां शरणं गच्छति, तस्याः कल्याणं भवति।

यः प्रत्यक्ष जिनेन्द्रदेवस्य दर्शनपूजनस्यकृते समयः प्रातः सांयकालसमये णमोकारमंत्रम् उच्चारयति, तेन सह 'चतारि मंगलं' पाठः अपि करोति।

**मांगलम्-**

(1) मंगं सुखं लाति इति मंगलम्।
(2) पापं गालयति इति मंगलम्।

**उतमम्-**

यः लोके सर्वेष महन्तः स्यात्, तम् उतमः कथ्यते। लोके अरहंत सिद्ध साधु धर्मश्च सर्वेषु महान अस्ति, अतः उतमो अस्ति।

जैनसेनाचार्याः 'महात्मा' शब्दस्य व्याख्याम् एव प्रकारेण कृतवन्तः।

**"मोक्षलक्षणमहार्थसाधकत्वेन महात्मा।"**

**शरणम्-**

'चतारि शरणं पव्वजामि' कथेननतात्पर्यमस्ति अस्तिपरकअर्थः तु अयमस्ति यत् अहं अरहंतस्य सिद्धस्य साधोः च शरणं गच्छामि परञ्च एतस्मिन् नास्तिपरक ध्वनिः नास्ति, यः सुखी भवेत् तं एतस्तिन् शरणं गन्तव्यम्।

अशरणभावनाविषये आचार्यकुन्दकुन्दाः कथ्यन्ति-

**"सग्गोहवे हि दुग्गंभिच्चा देवाय पहरणं वज्जं।**
**अइरावणो गइंदो इदस्सणविज्जदे सरणं।।**
**णवणिहि च उदहरयणं हयमत्तगंइद चाउरंगवलं।**
**चक्के सस्स ण सरणं पेच्छंता कछिये काले।।"[4]**

निश्चये न विचारः क्रियते चेत् स्व आत्मा एव शरणं अस्ति, किन्तु व्यवहारेण पंच परमेष्ठी अपि शरणं कथ्यते। एतान् त्यक्त्वा अन्यस्य शरणमन्वेषयति, अन्यस्यशरणं गच्छति, सः आत्मा बहिरात्मा अस्ति, मूढः मिथ्या दृष्टिरस्ति।

संसारीजीवान् 'चतारि शरणं पव्वज्जामि' महामंत्रस्य अपि नियमित जापं कर्तव्यम्।

एवं प्रकारेण दृश्यते यत् लोके परममंगलाः परमोतमा एव परमशरणभूताः एकमात्र पंचपरमेष्ठिनः एव सन्ति। णमोकारमहामन्त्रे परम मंगलमय , परमोतम एवं परमशरणभूतं पञ्चपरमेष्ठिनं एव नमस्कारः क्रियते, स्मरणः क्रियते।

एवं सिद्धं भवति यत् जैनानामयं महामंत्रः लौकिकोपलब्ध्यर्थं नास्ति, कामनार्थं नास्ति, अपितु नरमीाक्त्याः सहजस्फरणमस्ति। अन्तं डॉ- भारिल्लमहोदयानां पंक्त्यः एवं प्रकारेण सन्ति-

**"जिन्दगी एक पल कभी कोई बडा नही पायगा।**
**ठस रसायन सुज सुभट कोई बचा नही पायगा।।**
**सत्यार्थ है बस बात यह कुछ भी कहो व्यवहार में**
**जीवन मरण अशरण शरण कोई नही संसार में।।**
**निज आत्मा निश्चय शरण व्यवहार से परमात्मा।**
**जो खोजता नर की शरण वह आत्मा बहिरात्मा।।"[5]**

**णमोकारमंत्रस्य महत्वम्-**

मन्त्र-मन्त्रशक्ति सर्वसम्मतमस्ति।[6] गोम्मटसारग्रन्थे मंत्र विषये उक्तम्- मन्त्रशक्त्येः माहात्म्यो-'अचिन्त्यं हि तयो विद्यामाणि मन्त्रैषधिशक्त्यतिशयमाहात्म्यं दृष्टत्वभवत्वात्। स्वभावोऽतर्क गोचर इति समस्तवादि संयतत्वात्।'[7]

णमोकारमन्त्रं जैनानां मूलमन्त्रेऽस्ति। जैनागमेषु णमोकारमन्त्रस्य मिीमा अधिका कथिता। इयं सम्पूर्ण अभिलारूाः पूर्णाः करोति। आत्मशोधन हेतु भूतेसति अपि नित्य जाप कृतवान् रोगः, शोकः, व्याधिः, अधिः इत्यादिभिः समस्तविघ्नानि दूरं भवन्ति, समस्त मंगलेषु मंगलमस्ति। कस्यापि कार्यस्य आदौ स्मरणं कृत्वा सर्वाणि कार्यणि निर्विघ्नतया पूर्णनि भवन्ति।

कथितम्-

**"एसो पंचणमोकारो सव्वपावप्पणासणो।**
**मांगलाणं च सव्वेसिं पढमं होइ मंगलम्।।"[8]**

सिद्धचन्द्रगाणिनाा अस्या गाथायाः व्याख्या एवं प्रकारेण कृतम्- 'एष पञ्चनमस्कारः एष-प्रत्यक्षविधीयमानः पञ्चानामर्हदादीनां नमस्कारः- प्रणामः। स च कीदृशः? सर्वपापानि इति कर्मधारयः। सर्वपापानां प्रकर्षेण नाशनो-विध्वेसकः सर्वपापर्पणाशनः इति तत्पुरूषः। सर्वेषां द्रव्यभावभेदाभिन्नानां मंगलानां प्रथममिदमेव मंगलम्। च समुच्चये पञ्चसु पदेसु चतुर्थ्यर्थेषु षष्ठी। अत्र चाष्टषष्टिरक्षराणि, नव पदानि, अष्टौ च संपदो-विश्रामस्थानानि।

पुनः सर्वेषां मंगलानां-मंगलकारकवस्तूनां दकधदवूक्षित-चन्दननालिकेरपूर्णकलश स्वस्तिकदर्पण-भद्रासन-वर्धमान-मत्स्ययुगल-श्रीवत्सनन्द्यावर्तादीनाम् मध्ये प्रथमं मुख्यं मंगलं मंगलकारको भवति। यतोऽस्मिन् पठिते जप्ते स्मृते च सर्वाण्यपि मंगलानि भवन्तीत्यर्थः।[9]

तात्पर्यमस्ति यत् कस्यापि वस्तुनः महिमा तस्य गुणैः व्यक्ता भवति। महामन्त्रस्य गुणाः अचिन्त्याः सन्ति। महामन्त्रे विधुत शक्ति वर्तमानमस्ति। यस्य उच्चारणानन्तरं पापस्य अशुभस्य विध्वंस भवति। महामन्त्रेण कल्याणं प्राप्नोति। एतस्य णमोकारमन्त्रं माहात्म्य नमस्कार कल्पद्रु नमस्कार माहात्मय आदि प्रधानाः सन्ति।

अचिन्त्य महिमायाः वर्णनं णमोकारमन्त्रमाहात्म्यं च निम्नप्रकारेण कृतम्[10] –

**"मन्त्रं संसारसारं त्रिजगदनुपमं सर्वपापरिमन्त्रं,**
**संसारोच्छेदमन्त्रं विषमविषश्हरं कर्मनिर्मूलमन्त्रम्।**
**मन्त्रं सिद्धिप्रदानं शिवसुखजननं केवलज्ञानमन्त्रं,**
**मन्त्रं श्रीजैनमन्त्रं जप जप जपितं जन्मनिर्वाणमन्त्रम्।।1।।**
**आकृष्टिं सुरसंपदां विदधते मुक्तिश्रियो वश्यतां,**
**अञ्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम्।**
**स्तम्भं दुर्गमनं प्रति प्रयततो मोहस्य संमोहनं,**
**पायात्पञ्चनमस्क्रियाक्षरमयी साराधना देवता।।2।।**
**अपवित्रः पवित्रे वा सुस्थिता दुः स्थितोऽपि वा।**
**ध्यायेत् पञ्चनमस्कारं सर्वपापैः प्रमुच्यते।।3।।**
**अपवित्रः पवित्रे वा सर्वावस्थां गतोऽपि वा।**
**यः स्यरेत्परमात्मानं य बाह्याभ्यन्तरे शुचिः।।4।।**
**अपराजितमन्त्रेऽयं सर्वविघ्नविनाशनः।**
**मंगलेषु च सर्वेषु प्रथमं मंगलं मतः।।5।।**
**विघ्नायाः प्रलयं यान्ति शकिनीभूतपन्नगाः।**
**विषो निर्विषतां याति स्तूयमाने जिनेश्वर।।6।।**
**अन्यथा शरणं नास्ति त्वमेव शरणं मम।**
**तस्मात्कारूण्यभवेन रक्ष रक्ष जिनेश्वर।।7।।"**

एषः महामन्त्रः देवानां विभूर्तिं, सम्पर्तिं च आकर्षति, मुक्तिरूपी लक्ष्मीं स्ववषे करोति, चतुर्गतिषु वा कष्टं, विपर्तिं दूरकर्ता, आत्मनः समस्तपापानि समापयति, मोहस्य स्तम्भनवान्, विषयासक्ति, घटितवान्, असत्मश्रद्धां जाग्रतवान्, सर्वप्रकारेण प्राणिन् रक्षाकृतवान् अस्ति।

पवित्रः, अपवित्रः, शयनं, जागरणं, चलनं च क्रियते कस्यामपि अवस्थायां णमोकारस्य स्मरणं कृत्वा सर्वपापैः मुक्तं भवति, शरीरं मनः च पवित्रं भवति। इयं सप्त धातुमयं शरीरं सर्वदा पवित्रं भवति, एतस्य पवित्रता णमोकारमन्त्रस्य स्मरणेन उत्पन्ना निर्मला आत्मपरिणतिद्वारेण भवति।

अतः निःसंदेहमन्त्रं आत्मनं पवित्रे अकरोत्। एतस्य स्मरणं कस्यामपि अवस्थयां कर्तुं शक्यते। एषः णमोकारमन्त्रः अपराजितोऽस्ति, अन्य केनापि मन्त्रेण एतस्य शक्तिः प्रतिहता अवरुद्धा न कर्तुं शक्यते, अद्भूत सामर्थ्यनिहितोऽस्ति एतेन भूतः,पिशाचः, शकिनी,डाकिनी, सर्पः,सिंहः, अग्निः इत्यादिनां विघ्नान् क्षणे क्षणे एव दूरं कर्तुं शक्यते।

यथा हलाहल विषः तत्काल स्वफलं ददाति, तस्य च फलं व्यर्थं भवति, तथैव णमोकारमन्त्रेऽपि तत्काल शुभपुण्यस्य फलं ददाति तथा च अशुभोदयस्य प्रभावं न्यूनं करोति। एष मन्त्रः धन प्राप्त्यर्थमेक साधनं, तथा सम्यक्त्वस्य वृद्धौ सहायकं भवति। मनुष्यः आजीवनं पापास्रवं कृत्वा अपि अन्तिमसमये एतस्य महामन्त्रस्य स्मरणस्य प्रभावेन स्वर्गादिन् सुखान् प्राप्नोति। अतः महामन्त्रस्य महत्वमित्थं प्रकारेण कथितम्-

**"कृत्वा पाप सहस्राणि हत्वा जन्तु शतानि च।**
**अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गतांः।।"**[11]

अपि च-

**'स्मर मन्त्रपदोभूतां महाविद्यां जगन्नताम्।**
**गुरु पञ्चक नामोत्थ षोडशाक्षरराजिताम्।।**
**अर्हत्सिद्धाचार्योपाध्याय सर्व साधुभ्यो नमः।'**

**(षोडशाक्षरी विद्या)**[12]

भैया भगवतीदासः णमोकारमन्त्रःसमस्तसिद्धिनां दायकः कथितः अहर्निशं च एतस्य जापं आवश्यकं कथितम्। महामन्त्रस्य जापं कृत्वा सर्वाः बाधाः नष्टाः भवन्ति। कथितम्-

**"जहाँ जपे णमोकार वहाँ अघ कैसे आवें।**
**जहाँ जपे णमोकार वहाँ विंतर भग जावे।।**
**जहाँ जपे णमोकार वहाँ सुख सम्पति होई।**
**जहाँ जपे णमोकार वहाँ दुःख रहे न कोई।।**
**णमोकार जपत नवनिधिमिलै, सुख समूह आवे निकट।**
**'भैया' नित जपवो करो, महामन्त्र णमोकार हैं।।"**[13]

एषः णमोकारमन्त्रः सर्वविधामाकुलताः, दूरमकरोत्, शान्तेः समृद्धेः च दाता अस्ति। एतस्य अचिन्त्य शक्तिप्रभावेन कार्यक्षणे एव सिद्धयति। यथा रसायन सम्पर्केन स्मरणंख् मननेन अद्भूत सिद्धयः प्राप्नुवन्ति। आचार्य वादीभसिंहमहोदयाः क्षत्रचूडामणि पुस्तके कथितवन्तः-

**"मरणक्षणलब्धेन येन श्वा देवताऽजनि।**
**पञ्चमन्त्रपदं जाप्यमिदं केन न धीमता।।"**[14]

अतः सिद्धमस्ति यत् मन्त्रः आत्यविशुद्धयामतीव सहायकम्। कथितम्-**'णमोकार मन्त्रस्य एकः'**[15] अक्षरस्यापि भावसहित स्मरणं कृत्वा सप्त सागरपर्यंन्तं भोगाः नाशं प्राप्नुवन्ति, एक पदस्य भाव सहित स्मरणानन्तरं पञ्चशत् सागरपर्यन्तं भोगान् नाशयति, समग्रमन्त्रस्य च भक्तिभाव सहित विधिपूर्वकं स्मरणं कृत्वा पञ्चाशत् शतं सागरपर्यन्तं पापानि नष्टानि भवन्ति। अभक्त प्राणि अपि मन्त्रेण स्वर्गादिसुखं प्राप्नोति, तथा भक्तप्रणि अपि सुखं प्राप्नोति, भवभवान्तरस्य च संचितपापानि नाशयति, सः एतादृशं प्रबलपुझयास्रवं करोति, येन परम्परानिर्वाणस्य प्राप्तिः भवति।

सिद्धसेनमहोदयाः नमस्कारमाहात्म्ये उक्तम्

**"योऽसंख्यदुःखक्षयकारणस्मृतिः य ऐहिकामुष्यिक सौख्यकाम् धुक्।**
**यो दुष्षमायाभपिकल्पपादपोमन्त्रधिराजः सकथं न जप्यते।।"**[16]
**'न यद्दीपेन सूर्येण चन्द्रेणाप्यपरेण वा।**
**तमस्तदपि निर्नाम स्यान्नमस्कार तेजसा।।'**[17]

एतस्य मन्त्रस्य चिन्तनेन, स्मरणेन, मननेन च भूतः, ग्रहबाधा, राजभयः, चोरभयः, दुष्टभयः, रोगभयः इत्यादयः कष्टाः दूरं भवन्ति।

आगमस्य सारभूतो एषःणमोकारमन्त्रः अस्ति,एतस्या आराधनया सर्वप्रकारस्य कल्याणं प्राप्तं भवति।

श्री,ही, धृतिः,कीर्तिः, बुद्धिः, लक्ष्मी च इत्यादयः प्राप्तिः मन्त्रस्य जापेन प्राप्यते। निर्वाणपदस्य प्राप्तिः भवति। भगवतः पूजया, स्वाध्यायेन, संयमेन, तपसा, दानेन, गुरूभक्त्या च सह च प्रतिदिनं णमोकारमन्त्रस्य तिर्ससन्ध्यासु यः भक्तिभावसहितं जापं करोति, सः एतावत् पुण्यास्रवं करोति, येन चक्रवर्ती अहमिन्द्र इत्यादयः पदं प्राप्तेः शक्तिः उत्पद्यते।

इत्थं प्रकारेण व्यक्तिः स्वपुण्यातिशयकारणत्वात् तीर्थंकारः अपि भवितुं शक्नोति। स्वकीयेन सातिशय पुण्यस्यकारणेन् सः तीर्थप्रर्वतकपदं प्राप्तं भवति। तथा च यः मनुंष्यः एतस्य मन्त्रस्य अष्टवारं च निरन्तरं जापं करोति, निरन्तरं सप्तलक्षं जापं कृत्वा मनुष्यः सर्वविधकष्टेभ्यः मुक्तिं प्राप्नोति तथा च दारिद्रंमपि नष्टं भवति। धूपं दत्वा एकलक्षवारं जापं कृत्वा अपि स्वअभीष्टा मनोकामनां पूर्णां करोति।

**उपसंहारः**

विश्वास कृते तदेव आदर्शं मान्यभवितुं शक्नोति, यस्मिन् कस्यचित् सम्प्रदायविशेषस्य प्रभावः उत् वा यत् आदर्शः प्राणिमात्रर्थम् उपादेयमस्ति, तदेव विश्वं प्रभावितुं कर्तुं शक्नोति। णमोकारमन्त्रस्य आदर्शः कस्यचित् सम्प्रदायविशेषस्य आदर्शं नास्ति। एतस्मिन् नमस्कारः क्रियते आत्मनः अहिंसायाः विशुद्धः: मूर्तिः अस्ति। अहिंसा एतादर्थः धर्मः अस्ति, यस्य पालनं प्राणीमात्र कर्तुं शक्नोति, एतेन आर्देशेन च सर्वेषां कल्याणं कर्तुं शक्नोति। यदा मनुष्ये अहिंसा धर्मपूर्ण रूपेण प्रतिष्ठितां भवति तदा तस्य दर्शनेन, स्मारणेन च सर्वस्य सर्वत्र कल्याणं भवति।

**उक्तम्-**

**यत् 'अहिंसा प्रतिष्ठायां तत्संनिधौ वैरत्यागः।'**[18]

विश्वकल्याणं तेन एव मनुष्येन भवितुं शक्नोति, यः पूर्वं कल्याणम् अकरोत्। यस्मिन् दोषाः दुर्गणः च स्युः। सः अन्यदोषाणां परिमार्जनं कदापि न कर्तुं शक्नोति न ते आदर्श समाजार्थं कल्याणप्रदाः भवितुं शक्नुवन्ति। कल्याणमयी प्रवृत्यः तदेव सम्भवाः सन्ति, यदा आत्मा स्वच्छः निर्मलः भविष्यति। अशुद्धप्रवृत्या ग्रसित कल्याणमयी प्रवृतिं न भवितुं शक्नोति, न मनुष्यः त्यागमय जीवनं स्व प्रकारेण आप्नोति।

तथैव तु जैनसंस्कृतौ तानि एव वस्तूनि आगच्छन्ति यानि आत्मा शोधने सहायकानि भवन्ति, येन रत्नत्रयगुणस्य विकासः भवति। अत्रैव कारणमस्ति यत् जैनसंस्कृति अहिंसा, परिग्रहः, त्यागः, संयमः, तप इत्यादौ संस्कृतिः अनादिकालेन आगच्छति। अत एव णमोकारमन्त्रः, जैनसंस्कृतेः समीचीनं स्पष्टञ्च मानचित्रं प्रस्तौति।

**सन्दर्भग्रन्थ सूची :-**


1.षट्खण्डागम पुस्तकम्-1,भाग-1,पृष्ठ-53

2.आर्यिकाज्ञानमतिमाताजीस्वसिद्धान्तचिन्तामणिटीकाषट्खण्डागम,खण्ड-1,भाग-1,पृष्ठ-14,15

3.रतनचन्दभारिल्ल, णमोकारमहामंत्रः,पृष्ठ-47

4.बारस अणुवेक्खा(द्वादशानुप्रेक्षा) गाथा-9 एवं 10

5.बारहभावना- डॉ- हुकमचन्दभारिल

6.जैनेन्द्रसिद्धान्त कोश,भाग-3,पृष्ठ-256

7.गो-जी-/जी-प्र-/184/419/18(जै-सि-कोश,भा--3,पृ-256

8.मंगलमन्त्रणमोकार एक अनुचिन्तनम् पृष्ठ-33,34

9.मंगलमन्त्रणमोकार एक अनुचिन्तनम् पृष्ठ-34

10.णमोकारमन्त्रमाहात्म्य-नैमित्कि पाठावली पुस्तके प्रकाशित, पृष्ठ-1,2

11.ज्ञानार्णव, कुल श्लोक स--1960, पृ--626, पदस्थध्यानम् श्लोक सं-48

12.ज्ञानार्णव, कुल श्लोक स--1962, पृ--627, पदस्थध्यानम् श्लोक सं-50

13.मांगलमन्त्र णमोकार एक अनुचिन्तनम् पृष्ठ- 37,38

14.मांगलमन्त्र णमोकार एक अनुचिन्तनम् पृष्ठ- 37,38

15.मांगलमन्त्र णमोकार एक अनुचिन्तनम् ,डॉ- नेमिचन्द शास्त्री,पृष्ठ-38

16.मांगलमन्त्र णमोकार एक अनुचिन्तनम्, डॉ- नेमिचन्द शास्त्री,पृष्ठ-39

17.न-मा-, षष्ठ अ-, श्लोक-23,24

18.मांगलमन्त्र णमोकार एक अनुचिन्तनम्, पृष्ठ-160, उद्धृतम्